# Chapter 2
## साङ्ख्ययोग
## *sāṅkhyayoga*

सञ्जय उवाच
तं तथा कृपयाविष्टम्
अश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यम्
उवाच मधुसूदनः।।१।।

*sañjaya uvāca*
*taṁ tathā kṛpayāviṣṭam*
*aśrupūrṇākulekṣaṇam,*
*viṣīdantamidaṁ vākyam*
*uvāca madhusūdanaḥ.* (1)

श्रीभगवानुवाच
कुतस्त्वा कश्मलमिदं
विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यम्
अकीर्तिकरमर्जुन।।२।।

*śrībhagavānuvāca*
*kutastvā kaśmalamidaṁ*
*viṣame samupasthitam,*
*anāryajuṣṭamasvargyam*
*akīrtikaramarjuna.* (2)

क्लैब्यं मा स्म गमः पार्थ
नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं
त्यक्त्वोत्तिष्ठ परन्तप।।३।।

*klaibyaṁ mā sma gamaḥ pārtha*
*naitattvayyupapadyate,*
*kṣudraṁ hṛdayadaurbalyaṁ*
*tyaktvottiṣṭha parantapa.* (3)

अर्जुन उवाच
कथं भीष्ममहं सङ्ख्ये
द्रोणं च मधुसूदन।
इषुभिः प्रति योत्स्यामि
पूजार्हावरिसूदन।।४।।

*arjuna uvāca*
*kathaṁ bhīṣmamahaṁ saṅkhye*
*droṇaṁ ca madhusūdana,*
*iṣubhiḥ prati yotsyāmi*
*pūjārhāvarisūdana.* (4)

| | |
|---|---|
| गुरूनहत्वा हि महानुभावान् | *gurūnahatvā hi mahānubhāvān* |
| श्रेयो भोक्तुं भैक्ष्यमपीह लोके। | *śreyo bhoktuṁ bhaikṣyamapīha loke,* |
| हत्वार्थकामांस्तु गुरूनिहैव | *hatvārthakāmāṁstu gurūnihaiva* |
| भुञ्जीय भोगान् रुधिरप्रदिग्धान् ।।५।। | *bhuñjīya bhogān rudhirapradigdhān.* (5) |
| न चैतद्विद्मः कतरन्नो गरीयः | *na caitadvidmaḥ kataranno garīyaḥ* |
| यद्वा जयेम यदि वा नो जयेयुः। | *yadvā jayema yadi vā no jayeyuḥ,* |
| यानेव हत्वा न जिजीविषामः | *yāneva hatvā na jijīviṣāmaḥ* |
| तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ।।६।। | *te'vasthitāḥ pramukhe dhārtarāṣṭrāḥ.* (6) |
| कार्पण्यदोषोपहतस्वभावः | *kārpaṇyadoṣopahatasvabhāvaḥ* |
| पृच्छामि त्वां धर्मसम्मूढचेताः। | *pṛcchāmi tvāṁ dharmasammūḍhacetāḥ,* |
| यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे | *yacchreyaḥ syānniścitaṁ brūhi tanme* |
| शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।७।। | *śiṣyaste'haṁ śādhi māṁ tvāṁ prapannam.* (7) |
| न हि प्रपश्यामि ममापनुद्याद् | *na hi prapaśyāmi mamāpanudyād* |
| यच्छोकमुच्छोषणमिन्द्रियाणाम्। | *yacchokamucchoṣaṇamindriyāṇām,* |
| अवाप्य भूमावसपत्नमृद्धं | *avāpya bhūmāvasapatnamṛddhaṁ* |
| राज्यं सुराणामपि चाधिपत्यम् ।।८।। | *rājyaṁ surāṇāmapi cādhipatyam.* (8) |
| सञ्जय उवाच | *sañjaya uvāca* |
| एवमुक्त्वा हृषीकेशं | *evamuktvā hṛṣīkeśaṁ* |
| गुडाकेशः परन्तप। | *guḍākeśaḥ parantapa,* |
| न योत्स्य इति गोविन्दम् | *na yotsya iti govindam* |
| उक्त्वा तूष्णीं बभूव ह।।९।। | *uktvā tūṣṇīṁ babhūva ha.* (9) |

| | |
|---|---|
| तमुवाच हृषीकेशः<br>प्रहसन्निव भारत।<br>सेनयोरुभयोर्मध्ये<br>विषीदन्तमिदं वचः।।१०।। | *tamuvāca hṛṣīkeśaḥ*<br>*prahasanniva bhārata,*<br>*senayorubhayormadhye*<br>*viṣīdantamidaṁ vacaḥ.* (10) |
| श्रीभगवानुवाच | *śrībhagavānuvāca* |
| अशोच्यानन्वशोचस्त्वं<br>प्रज्ञावादांश्च भाषसे।<br>गतासूनगतासूंश्च<br>नानुशोचन्ति पण्डिताः।।११।। | *aśocyānanvaśocastvaṁ*<br>*prajñāvādāṁśca bhāṣase,*<br>*gatāsūnagatāsūṁśca*<br>*nānuśocanti paṇḍitāḥ.* (11) |
| न त्वेवाहं जातु नासं<br>न त्वं नेमे जनाधिपाः।<br>न चैव न भविष्यामः<br>सर्वे वयमतः परम्।।१२।। | *na tvevāhaṁ jātu nāsaṁ*<br>*na tvaṁ neme janādhipāḥ,*<br>*na caiva na bhaviṣyāmaḥ*<br>*sarve vayamataḥ param.* (12) |
| देहिनोऽस्मिन्यथा देहे<br>कौमारं यौवनं जरा।<br>तथा देहान्तरप्राप्तिः<br>धीरस्तत्र न मुह्यति।।१३।। | *dehino'sminyathā dehe*<br>*kaumāraṁ yauvanaṁ jarā,*<br>*tathā dehāntaraprāptiḥ*<br>*dhīrastatra na muhyati.* (13) |
| मात्रास्पर्शास्तु कौन्तेय<br>शीतोष्णसुखदुःखदाः।<br>आगमापायिनोऽनित्याः<br>तांस्तितिक्षस्व भारत।।१४।। | *mātrāsparśāstu kaunteya*<br>*śītoṣṇasukhaduḥkhadāḥ,*<br>*āgamāpāyino'nityāḥ*<br>*tāṁstitikṣasva bhārata.* (14) |

**यं हि न व्यथयन्त्येते**
**पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं**
**सोऽमृतत्वाय कल्पते।।१५।।**

*yaṁ hi na vyathayantyete*
*puruṣaṁ puruṣarṣabha,*
*samaduḥkhasukhaṁ dhīraṁ*
*so'mṛtatvāya kalpate.* (15)

**नासतो विद्यते भावः**
**नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तः**
**त्वनयोस्तत्त्वदर्शिभिः।।१६।।**

*nāsato vidyate bhāvaḥ*
*nābhāvo vidyate sataḥ,*
*ubhayorapi dṛṣṭo'ntaḥ*
*tvanayostattvadarśibhiḥ.* (16)

**अविनाशि तु तद्विद्धि**
**येन सर्वमिदं ततम्।**
**विनाशमव्ययस्यास्य**
**न कश्चित्कर्तुमर्हति।।१७।।**

*avināśi tu tadviddhi*
*yena sarvamidaṁ tatam,*
*vināśamavyayasyāsya*
*na kaścitkartumarhati.* (17)

**अन्तवन्त इमे देहाः**
**नित्यस्योक्ताः शरीरिणः।**
**अनाशिनोऽप्रमेयस्य**
**तस्माद्युध्यस्व भारत।।१८।।**

*antavanta ime dehāḥ*
*nityasyoktāḥ śarīriṇaḥ,*
*anāśino'prameyasya*
*tasmādyudhyasva bhārata.* (18)

**य एनं वेत्ति हन्तारं**
**यश्चैनं मन्यते हतम्।**
**उभौ तौ न विजानीतः**
**नायं हन्ति न हन्यते।।१९।।**

*ya enaṁ vetti hantāraṁ*
*yaścainaṁ manyate hatam,*
*ubhau tau na vijānītaḥ*
*nāyaṁ hanti na hanyate.* (19)

**न जायते म्रियते वा कदाचित्**
**नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणः**
**न हन्यते हन्यमाने शरीरे।।२०।।**

*na jāyate mriyate vā kadācit*
*nāyaṁ bhūtvā bhavitā vā na bhūyaḥ,*
*ajo nityaḥ śāśvato'yaṁ purāṇaḥ*
*na hanyate hanyamāne śarīre.* (20)

वेदाविनाशिनं नित्यं
य एनमजमव्ययम्।
कथं स पुरुषः पार्थ
कं घातयति हन्ति कम्।।२१।।

*vedāvināśinaṁ nityaṁ*
*ya enamajamavyayam,*
*kathaṁ sa puruṣaḥ pārtha*
*kaṁ ghātayati hanti kam.* (21)

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही।।२२।।

*vāsāṁsi jīrṇāni yathā vihāya*
*navāni gṛhṇāti naro'parāṇi,*
*tathā śarīrāṇi vihāya jīrṇāni*
*anyāni saṁyāti navāni dehī.* (22)

नैनं छिन्दन्ति शस्त्राणि
नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापः
न शोषयति मारुतः।।२३।।

*nainaṁ chindanti śastrāṇi*
*nainaṁ dahati pāvakaḥ,*
*na cainaṁ kledayantyāpaḥ*
*na śoṣayati mārutaḥ.* (23)

अच्छेद्योऽयमदाह्योऽयम्
अक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुः
अचलोऽयं सनातनः।।२४।।

*acchedyo'yamadāhyo'yam*
*akledyo'śoṣya eva ca,*
*nityaḥ sarvagataḥ sthāṇuḥ*
*acalo'yaṁ sanātanaḥ.* (24)

अव्यक्तोऽयमचिन्त्योऽयम्
अविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं
नानुशोचितुमर्हसि।।२५।।

*avyakto'yamacintyo'yam*
*avikāryo'yamucyate,*
*tasmādevaṁ viditvainaṁ*
*nānuśocitumarhasi.* (25)

अथ चैनं नित्यजातं
नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो
नैवं शोचितुमर्हसि।।२६।।

*atha cainaṁ nityajātaṁ*
*nityaṁ vā manyase mṛtam,*
*tathāpi tvaṁ mahābāho*
*naivaṁ śocitumarhasi.* (26)

जातस्य हि ध्रुवो मृत्युः
ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे
न त्वं शोचितुमर्हसि।।२७।।

*jātasya hi dhruvo mṛtyuḥ*
*dhruvaṁ janma mṛtasya ca,*
*tasmādaparihārye'rthe*
*na tvaṁ śocitumarhasi. (27)*

अव्यक्तादीनि भूतानि
व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव
तत्र का परिदेवना।।२८।।

*avyaktādīni bhūtāni*
*vyaktamadhyāni bhārata,*
*avyaktanidhanānyeva*
*tatra kā paridevanā.* (28)

आश्चर्यवत्पश्यति कश्चिदेनम्
आश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ।।२९।।

*āścaryavatpaśyati kaścidenam*
*āścaryavadvadati tathaiva cānyaḥ,*
*āścaryavaccainamanyaḥ śṛṇoti*
*śrutvāpyenaṁ veda na caiva kaścit.* (29)

देही नित्यमवध्योऽयं
देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि
न त्वं शोचितुमर्हसि।।३०।।

*dehī nityamavadhyo'yaṁ*
*dehe sarvasya bhārata,*
*tasmātsarvāṇi bhūtāni*
*na tvaṁ śocitumarhasi.* (30)

स्वधर्ममपि चावेक्ष्य
न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्
क्षत्रियस्य न विद्यते।।३१।।

*svadharmamapi cāvekṣya*
*na vikampitumarhasi,*
*dharmyāddhi yuddhācchreyo'nyat*
*kṣatriyasya na vidyate.* (31)

यदृच्छया चोपपन्नं
स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ
लभन्ते युद्धमीदृशम्।।३२।।

*yadṛcchayā copapannaṁ*
*svargadvāramapāvṛtam,*
*sukhinaḥ kṣatriyāḥ pārtha*
*labhante yuddhamīdṛśam.* (32)

अथ चेत्त्वमिमं धर्म्यं
सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च
हित्वा पापमवाप्स्यसि।।३३।।

*atha cettvamimaṁ dharmyaṁ*
*saṅgrāmaṁ na kariṣyasi,*
*tataḥ svadharmaṁ kīrtiṁ ca*
*hitvā pāpamavāpsyasi.* (33)

अकीर्तिं चापि भूतानि
कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिः
मरणादतिरिच्यते।।३४।।

*akīrtiṁ cāpi bhūtāni*
*kathayiṣyanti te'vyayām,*
*sambhāvitasya cākīrtiḥ*
*maraṇādatiricyate.* (34)

भयाद्रणादुपरतं
मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतः
भूत्वा यास्यसि लाघवम्।।३५।।

*bhayādraṇāduparataṁ*
*maṁsyante tvāṁ mahārathāḥ,*
*yeṣāṁ ca tvaṁ bahumataḥ*
*bhūtvā yāsyasi lāghavam.* (35)

अवाच्यवादांश्च बहून्
वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं
ततो दुःखतरं नु किम्।।३६।।

*avācyavādāṁśca bahūn*
*vadiṣyanti tavāhitāḥ,*
*nindantastava sāmarthyaṁ*
*tato duḥkhataraṁ nu kim.* (36)

हतो वा प्राप्स्यसि स्वर्गं
जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय
युद्धाय कृतनिश्चयः।।३७।।

*hato vā prāpsyasi svargaṁ*
*jitvā vā bhokṣyase mahīm,*
*tasmāduttiṣṭha kaunteya*
*yuddhāya kṛtaniścayaḥ.* (37)

सुखदुःखे समे कृत्वा
लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व
नैवं पापमवाप्स्यसि।।३८।।

*sukhaduḥkhe same kṛtvā*
*lābhālābhau jayājayau,*
*tato yuddhāya yujyasva*
*naivaṁ pāpamavāpsyasi.* (38)